# संस्कृत वार्ता:

दिनाङ्क : 06/03/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- प्रधानमन्त्रिणा नरेन्द्रमोदिना निर्यातम् उद्दिश्य रसायनमुक्तं प्राकृतिक-कृषेः आह्वानं कृतम्।
- इण्डिगो इत्यनेन अस्य मासस्य एकत्रिंशत् दिनाङ्कपर्यन्तं पश्चिमेशिया-देशात्, इस्तान्बुल्-देशात् च यात्रार्थं निःशुल्कं निरस्तीकरणं विस्तारितम्।
- उत्तराखण्डस्य चारधामयात्रायाः कृते अद्य ऑनलाइन पञ्जीकरणम् आरब्धम्।
- ऑल-इंग्लैंड-ओपन-बैडमिण्टन्-चैंपियनशिप-क्रीडायां लक्ष्यसेनः अद्य रात्रौ अन्तिमाष्ट-स्पर्धायां चीनदेशस्य ली-शी-फेङ्ग् इत्यमुं सम्मुखी करिष्यति।

-----------------------------------------------------

<u>प्रधानमन्त्री-कृषि</u>

कृषिः भारतीय-अर्थव्यवस्थायाः मेरुदण्डः, दीर्घकालीनविकास-यात्रायाः महत्त्वपूर्णः स्तम्भः च अस्ति इति प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तम्। कृषिः तथा ग्रामीणपरिवर्तनम् इत्यस्मिन् विषये आयव्ययक वेबिनार इत्यस्य अनन्तरं आयोजितां वेबिनार-चर्चां आभासीय-माध्यमेन सम्बोधयन् श्रीमोदी अवदत् यत् कृषिक्षेत्रं सुदृढीकरणाय सर्वकारेण नियमितरूपेण अनेकानि उपायानि कृतानि सन्ति।

सः अवदत् यत् अस्मिन् वर्षे केन्द्रीय-आयव्ययके कृषिक्षेत्रं ग्रामीणपरिवर्तनं च शक्तिं प्रदत्तास्ति। श्रीमोदी अवदत् यत्, भारते सम्प्रति अन्नधान्यानां, द्विदलानां, तैलबीजानां च उत्कृष्टोत्पादनं भवति।

प्रधानमन्त्री श्रीमोदी, निर्यातस्य विषये विशिष्टावधानेन सह, रसायन-मुक्तकृषिं प्राकृतिककृषिं च सुदृढीकर्तुम् आग्रहम् अकरोत्। सः अवदत् यत् केन्द्रीय-आयव्ययके षड्विंशत्यधिक द्विसहस्र

सप्तविंशत्यधिक द्विसहस्रयोः मध्ये उच्चमूल्ययुत-कृषि-उत्पादानां विषये अपि विशिष्टावधानं प्रदत्तम् अस्ति।

श्री मोदी वर्यः अवदत् यत् प्रायः दशकोटिः कृषकाः प्रधानमन्त्री-किसान-सम्मान-निधि-योजनायाः अन्तर्गतं चतुर्लक्ष-कोटिरूप्यकाधिकानि धनानि प्राप्तवन्तः। श्रीमोदी अवदत् यत् सर्वकारेण प्रायः नवकोटि-कृषकाणां परिचयपत्राणां डिजिटलीकरणं कृतम्। प्रधानमन्त्रिणा उक्तं यत्, सर्वकारः कृषिकार्ये प्रौद्योगिकीति आनेतुं प्रबलं महत्त्वं प्रददति। श्रीमोदी ख्यापितवान् यत् सर्वकारेण त्रि-कोटि-लखपति-दीदी इति निर्माणस्य लक्ष्यं सफलतया प्राप्तमस्ति तथा च देशे ऊनविंशत्यधिक द्विसहस्रतम वर्षपर्यन्तं इतोऽपि त्रि-कोटि-लखपति-दीदी योजयितुं लक्ष्यं निर्धारितम् अस्तीति।

सत्रेषु पशुपालन-मूल्यशृङ्खलायां निजीक्षेत्रस्य निवेशः उद्यमशीलता च, जलाशयानां एकीकृतविकासः, मत्स्यपालनाय अमृतसरोवर् इत्यादिनां विषयेषु ध्यानं दीयते। तथैव, स्वसहायता-उद्यमानां माध्यमेन ग्रामीण-महिला-उद्यमिनः निर्मितानां उत्पादनानां आपण-प्रवेशं वर्धयितुं अपि चर्चा भविष्यति।

-----------------------------------------------------

## इंडिगो-निरस्तिकरणम्

पश्चिमेशियायां प्रवर्तमान-स्थित्याम्, इण्डिगो-विमान-संस्थया निरस्तिकरणानां कृते निःशुल्क-मुक्तेः घोषणा कृतास्ति। एकस्मिन् वक्तव्ये, इण्डिगो इत्यनेन उक्तं यत् पश्चिमेशियादेशैः इस्तान्बुल्-देशात् च यात्रार्थं, अस्य मासस्य एकत्रिंशत् दिनाङ्कपर्यन्तं, निरस्तिकरणानां विषये पूर्ण-मुक्तेः निर्णयः कृतः अस्ति इति। विमान संस्थया यात्रिभिः सूचितं यत् यदि ते यात्रां कर्तुं इच्छन्ति एव तर्हि विमानस्य स्थितिं अवश्यमेव पश्यन्तु इति। अधिक-स्पष्टीकरणार्थं यात्रिनः ग्राहकसम्पर्ककेन्द्रे सम्पर्कं कर्तुं शक्नुवन्तीति इण्डिगो इत्यनेन उक्तम्।

-----------------------------------------------------

## अमित-शाहः-(सी. आई. एस्. एफ्.)

केन्द्रीय-गृह-मन्त्री अमित-शाहः अद्य अवदत् यत् केन्द्रीय-औद्योगिक-सुरक्षा-बलेन (सी. आई. एस्. एफ्.) इत्यनेन विना भारतस्य औद्योगिक-विकासः असम्भवः एव अस्ति। कटक-नगरस्य मुण्डुली-नगरे सी. आई. एस्. एफ़्. इत्यस्य सप्तपञ्चाशत्तम-स्थापना-दिवसोत्सवम् अभिसंबोधयन् श्रीशाहः अवदत् यत्, देशस्य प्रमुखेषु औद्योगिक-संस्थानेषु सुरक्षां सुनिश्चेतुं बलस्य महत्त्वपूर्णा भूमिका अस्ति । सः अवदत् यत् महत्त्वपूर्ण-समुद्रीय-सौकर्येषु सुरक्षां अधिकं सुदृढं कर्तुं शीघ्रमेव पत्तन-सुरक्षां सी. आई. एस्. एफ़्.-संस्थायै समर्पयिष्यते। माओवादिनः विरुद्धस्य युद्धस्य उल्लेखं कुर्वन्, गृहमन्त्रिणा अस्य मार्च-मासस्यान्तं यावत् भारतं नक्सल्-मुक्तं भविष्यति इति आत्मविश्वासोपि प्रकटितवान्।

-----------------------------------------------------

## रक्षामंत्री मैरीटाईम संवाद:

रक्षामंत्री राजनाथसिंहः अद्य अवदत् यत् वर्तमानस्य अनिश्चिततायाः युगे प्रासङ्गिकतायाः सज्जतायाः च एकमात्र-मार्गः आत्मनिर्भरता एव अस्ति इति। पश्चिमवङ्गप्रदेशस्य कोलकाता-नगरे सागरसङ्कल्पः-रिक्लाईमिङ्ग् इंडियास् मैरिटाईम ग्लोरी इति रक्षा-समुद्रीय-संवादस्य उद्घाटनानन्तरं श्रीसिंहः एतत् उक्तवान्। सः अधोरेखितवान् यत् वर्तमान-वैश्विक-परिस्थित्या आपूर्तिशृङ्खलायाः साक्षात्कारः, नूतनानां समीकरणानां निर्माणं, समुद्रीयक्रियाकलापानां निरन्तरं वृद्धिः च अभवत् इति। मन्त्री प्रत्येकस्मिन् क्षेत्रे स्वावलंबनस्य सर्वकारस्य संकल्पं पुनः दृढीकृतवान्।

-----------------------------------------------------

## ईडी-अंबानी

परवर्तन-निर्देशालयेन उद्योगपतिना अनिल-अम्बानी इत्यनेन, रिलायन्स्-पावर इत्यनेन च सम्बद्धेषु संवायेषु अन्वेषणम् समारब्धम्। ई. डी. इत्यस्य सूत्रानुसारं अद्य प्रातःकाले अन्वेषणम् आरब्धं, सम्प्रति मुम्बई-हैदराबाद्-नगरयोः दशतः द्वादश स्थानेषु अन्वेषणं प्रचलति। प्रायः पञ्चदश ई. डी. दलानि अन्वेषणकार्याणि निर्वहन्ति। ई. डी. इत्यस्य स्रोतस्यानुसारं रिलायन्स्-पावर्-लिमिटेड् इत्यनेन सह सम्बद्धानां जनानां स्थानेषु अन्वेषणम् प्रचलति।

-----------------------------------------------------

## उत्तराखण्डस्य यात्रायाः पञ्जीकरणं

उत्तराखण्डस्य विश्वप्रसिद्धायाः चारधाम-यात्रायाः कृते अद्य अन्तर्जालीय-पञ्जीकरणं समारब्धम्। भक्ताः पर्यटनविभागस्य आधिकारिकं जालपुटके रजिस्ट्रेशन-एंड-टूरिस्ट-केयर.uk.gov.in तथा मोबाइल ऐप् टूरिस्ट केयर उत्तराखण्ड इत्यनेन पञ्जीकरणं कर्तुं शक्नुवन्ति। पर्यटनसचिवः धीरज गर्ब्यालः अवदत् यत् अस्मिन् वर्षे अप्रैल-मासस्य ऊनविंशति दिनाङ्के चारधाम-यात्रा आरभ्यते। तस्मिन् एव दिने यमुनोत्रीदेवालयस्य, गङ्गोत्रीदेवालयस्य च द्वाराणि भक्तानां कृते उद्घाट्यन्ते। केदारनाथमन्दिरस्य द्वाराणि अप्रैल द्वाविंशति दिनाङ्के उद्घाट्यन्ते, बद्रीनाथमन्दिरस्य द्वाराणि अप्रैल त्रयोविंशति दिनाङ्के उद्घाट्यन्ते। चारधामयात्रायां भागं ग्रहीतानां तीर्थयात्रिणां कृते पञ्जीकरणम् अनिवार्यं कृतम् अस्ति।

-----------------------------------------------------

## बैडमिण्टन

ऑल-इंग्लैंड-ओपन-बैडमिण्टन-चैम्पियन्शिप-क्रीडायां लक्ष्यसेनः अद्य रात्रौ अन्तिमाष्ट स्पर्धायां चीनदेशस्य ली-शी-फेङ्ग् इत्यनेन सह क्रीडिष्यति। ।

॥ इति वार्ता: ॥